Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 3 | ISSN : 2581- 6306

# प्राथमिकस्तरीय अध्यापिकानां व्यक्तित्वविकासे समायोजनशीलतायाः शैक्षिकोपादेयता

प्रतिभा
शोधच्छात्रा, केन्द्रीयसंस्कृतविश्वविद्यालयः,परिसरः- भोपालः।

**Article Info**
Volume 5, Issue 3
Page Number : 84-87
**Publication Issue :**
May-June-2022
**Article History**
Accepted : 01 May 2022
Published : 30 May 2022

**शोधसारांशः -** जनः नित्यं विविधानां सङ्घर्षाणां साक्षात्कारं विदधाति। तत्कृते एतदावश्यकं भवति यत् स स्वकीयानां कामनानां सामाजिकापेक्षानाञ्च इत्यनयोर्मध्ये सामञ्जस्यं स्थापितं कुर्यादिति। एतदर्थं संसूचिकाः एव व्यक्तित्वमित्युच्यते। यतोहि मनुष्यः सामाजिकस्य सांस्कृतिकस्य च पर्यावरणस्य विषये साम्यावस्थामेव समायोजनपूर्ण व्यक्तित्वं धारयति। अतएव अध्यापिकाध्यापकाः विविधसामाजिक- सांस्कृतिक एवं नैतिककार्यक्रमैः स्वव्यवहारे आचरणे व परिवर्तनं तथा च सामञ्जस्यं कर्तुं शक्यते। अस्य विषये वैदिक वाङ्गमये अपि वर्णितम्- 'आचारहीनं न पुनन्ति वेदाः'।

मुख्यशब्दः - शिक्षा, समायोजनम्, व्यक्तित्वम्, अध्यापिका, छात्राः।

जीवनस्य सर्वासु परिस्थितिषु जनानां विशिष्टाचरणस्य व्यवहारशैल्याश्च प्रदर्शनं दृश्यते। सर्वे जनाः स्कीयया अन्तर्क्रियया कार्यपद्धतिं प्रभावयन्ति। सर्वाष्वेवपरिस्थितिषु "व्यक्तित्वमेकं महत्त्वपूर्णं अंगरूपे विद्यमानं भवति। सात्मनो व्यवहारमन्येषां समक्षम् उपस्थापयति , विशिष्टाञ्च कार्यशैलीमाप्नोति[1]। एतत् सर्वं तस्य व्यक्तित्वमेव प्रदर्शयति व्यक्तित्त्वस्य सन्दर्भे समाजे अनेकाः भ्रान्ताः धारणाः प्रचलन्ति। साधारणभाषायां व्यक्तित्वपदस्य प्रयोगः शरीरिके मण्डनार्थे सौंदर्यार्थे च विधीयते प्रायशः एवं मन्यते यत् अमुकजनस्य व्यक्तित्त्वं सुन्दरमस्ति आकर्षकञ्च। अत्र शरीराकृतेः रूपलावण्यस्य बाह्यतो दृश्यमानं स्वरूपमेव व्यक्तित्त्वं मन्यते यथा-

**वस्त्रेण वपुषा वाचा विद्यया विनयेन च।**
**वकारैः पञ्चभिर्युक्तः नरो भवति पूजितः॥**[2]

एतदतिरिच्य व्यक्तित्वपदं चरित्रस्य नैतिकतायाश्च समानार्थकपदरूपेऽपि समाजेप्रचलितं वर्तते। यो सच्चरित्रवान् तस्य व्यक्तित्वमुत्तमिति मन्यते। यतोहिसच्चरित्रविषये एव मनुनाऽपि उक्तम् –

**"एद्देश प्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**[3]

व्युत्पत्तिदृष्ट्या **'वि' उपसर्गपूर्वकात् 'अञ्ज्'** धातोर्निष्पन्नं व्यक्तिरिति पदम्। पदमिदं यद्वस्तु अभिव्यक्तं सत् दृष्टिगोचरं भवति तत् कथयति –

**"जातिर्जातं च सामान्य व्यक्तिः।"**[4]

एवम्प्रकारेण मानवे स्थिताः ये साधारणाः असाधारणाश्च गुणाः ते एनमन्येभ्यो मानवेभ्यः पृथक् कृत्वा प्रदर्शयन्ति व्यक्तित्त्वेन अवबोध्यते। एतेषां धर्माणां समुदायः एव मानवव्यक्तित्त्व पदमाङ्ग्लभाषायाः **"पर्सेनालिटी" (personality)** इति पदस्य रूपान्तरणं वर्तते। पदमिदं मुखावरणार्थकात् **"पर्सोना"** (persona) इति ग्रीक भाषापदात् निष्पन्नम्। यतोहि पुराकाले जनाः

---

[1] - सुभाषितरत्नभण्डागारम्
[2]- सुभाषितरत्नभण्डागारम्
[3] - मनुस्मृतिः- 1/20
[4] -अमरकोशः

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

स्वगृहीत पात्रानुगुणं मुखावरणं धारयन्ति स्म ।[5] भारतीयशास्त्रेषु विद्वद्भिः व्यक्तित्त्वस्य प्रचलितस्वरूपविषये विचारः कृतः वर्तते । भारतीय वाङ्गमये व्यक्तित्त्वस्याध्ययने आत्मनः स्वस्य च केन्द्रीयं स्थानं वर्तते । उपनिषत्सु निरूपिताः अन्नमयादिपञ्चकोषाः शरीरादात्मानं प्रति उत्तरोत्तरविकासस्य परिचायकाः वर्तन्ते । एतेषां कोषाना सम्बन्धो व्यक्तित्त्वस्य विवधैः आयामैः वर्तन्ते । अतएव व्यक्तित्त्वस्याध्ययने एतेषां कोषानामाधारं गृह्यते । **प्रथमोऽन्नमयकोशः** शरीरस्य सर्वोपरिकोषो वर्तते । मानवस्य स्थूलशरीरमन्नमयकोशो वर्तते **।** **द्वितीयः** प्राणमयकोशः जीवनस्य शक्त वासनाभ्यश्चोतप्रोतो वर्तते । यतोहि अत्रैव पञ्चप्राणाः (प्राणापानसमानोदानव्यानाः) तिष्ठन्ति । पञ्चकर्मेन्द्रियाणां विवरणं प्राणमयकोषसन्दर्भे एव कृतं वर्तते । **तृतीयमनोमयकोषे** आत्मनःस्वरूपं विविच्यते । अतः सर्वाङ्गपूर्णव्यक्तित्त्वस्य मनोमयसोपानस्याधारो 'मनः'एवासीत् । मनसः स्वरूपं रूपकमाध्यमेन कठोपनिषदे विवेचितं वर्तते यथा –

**"आत्मानं रथिनं विद्धिः शरीरं रथमेव तु ।**
**बुद्धिः तु सारथिं विद्धिः मनः प्रग्रहमेव च ।।**[6]

अतः मनसो नियंत्रणमात्माना विधीयते । **चतुर्थः** विज्ञानमयकोषात् व्यक्तित्त्वे आध्यात्मिकबुद्धिः उपस्थिता भवति । बुद्धिसंयुक्तानि पञ्चज्ञानेन्द्रियाणि विज्ञानमयकोष नाम्ना अभिधीयन्ते | एतस्य अन्तःकोषः कथ्यते । भोगानां शान्ते सति सैव बुद्धिवृत्तिः निद्रायाः रूपे विलीना जायते । सैव विलीना बुद्धिवृत्तिरेव आन्नदमयकोषो वर्तते । एषः कोषः कदाचिदेव भवति । सर्वदा नैव उपस्थितो भवति **"अन्नादप्राचुर्यम्"**| व्यक्तित्त्वगुणानां वर्णनं वाल्मीकिरामायणेऽपि प्राप्यते । तत्र रामविषयकस्य पूर्णव्यक्तित्त्वस्य जिज्ञासुः भूत्वा वाल्मीकिः **"कोऽन्वस्मिन् साम्प्रतम लोके"** इत्यादिना नारदं बहु पृच्छति स्म । ततः नारदो रामस्य व्यकतित्व द्योतकान् गुणान् वर्ण्यते यथा –

**"ज्ञाने मौनं क्षमा शक्ती त्यागे श्लाघा विपर्ययः ।**
**गुणा गुणानुबन्धित्वात् तस्य सप्रसवा इव ॥"**[7]

सर्वाङ्गपूर्ण व्यक्तित्त्वस्य प्रतिपादनं श्रीमद्भागवद्गीतायां' सत्वरजस्तमोगुणानां' वर्णनेनापि कर्तुं शक्यते । सर्वेषु जनेषु त्रयाणामेव गुणानां समानता नैव भवति । त्रयाणामेव गुणानां मात्राभेदेन व्यक्तित्त्वभेदाः जायन्ते । सत्वगुणात् ज्ञानं, रजोगुणाल्लोभः, तमोगुणाच्च प्रमादमोहौ जायेते वर्णितानां-

**सत्वात्संजायते ज्ञानं रजसो लोभ एव च ।**
**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥"**[8]

मनुस्मृतावपि त्रिगुणात्मिकायाः सृष्टेः विवरणं प्राप्यते । सांख्यकारिकायां त्रयाणामेव गुणानां स्वरूपं वर्णितं वर्तते यत्-

**"सत्वं लघु प्रकाशमिष्टम्भकं चलञ्च रजः ।**
**गुरुवरणकमेव तमः प्रदीपवच्चार्यतो वृतिः।।**[9]

एवम्प्रकारेण व्यक्तित्वविवेचने 'श्रीमद्भगवद्गीतायाः गुणातीतलक्षणं' महत्त्वपूर्णवर्तते । एतेषां यानि लक्षणानि भवन्ति , तैरेव परिपक्वस्य व्यक्तित्त्वस्यापि निश्चेतुं शक्यते । आयुर्वेदशास्त्रे **"वातपित्तकफधातुत्रयं"** पुरस्कृत्य व्यक्तित्वभेदाः प्राप्यते । ज्योतिषशास्त्रेऽपि विद्वान्सः जन्मराश्यानुगुणं व्यक्तित्वं द्वादशधाः कल्पयन्ति । एवम्प्रकारेण भारतीयवाङ्गमये व्यक्तित्त्वस्य विकासविषये व स्वरूपविषये तदन्तर्निहितगुणानां विषये प्रभूतो विचारो विहितो वर्तते । यतोहि व्यक्तित्त्वस्यविविधानां पक्षाणां नैकेषु ग्रन्थेषु विवरणं प्राप्यते । पाश्चात्यमते व्यक्तित्त्वस्य स्वरूपं निम्नरूपेण अस्य विषये विवेचितम् -

[5] -डॉ. लोकमान्य मिश्रः, आधुनिकं शिक्षामनोविज्ञानम् पृ.सं. 261

[6]- कठोपनिषद् १.३.३

[7] - रघुवंशम् प्रथमः सर्गः

[8] - गीता. १४/१७

[9] - ईश्वरकृष्ण ,सांख्यकारिका श्लोक सं. 13

**वाटसनमहोदयः** उक्तम् यत्- "विश्वसनीयसूचनादृष्ट्या चिरकालपर्यन्तं वास्तिकावलोकनान्तरं व्यक्तेः कस्याश्चित् क्रियायाः व्यवहारस्य च यत्किमपि रूपं प्राप्यते तदेव तस्यव्यक्तित्त्वमिति कथ्यते[10]।

एवम्प्रकारेण व्यक्तित्त्वविषये-

**आइजैन्कमहोदयः** अपि उक्तं यत् -"व्यक्तित्वं व्यक्तेश्चरित्रस्य, स्वभावस्य, बुद्धेः, शरीरसंरचनायाश्च यत्किन्चिदपि एतादृशं स्थायी स्थिरञ्च सङ्घटनं वर्तते। यद्वातावरणेन सहतस्यानन्यं समायोजनं निर्धारियतीति इति।[11]"

personality is the more or less stable and enduring organization of a person; s character, temperament, intellect and physique, which determines his unique adjustment to the environment."

**ऑलपोर्टमहोदयेन-** विद्वत्सु प्रलितानांप्रायशः पञ्चाशतसंख्याकानां व्यक्तित्त्वपरिभाषाः प्रदत्ताः तेनोक्तम्- व्यक्तित्त्वं व्यक्तेस्तेषां मनोदैहिकावस्थानां गतिशीलंसंघटनमस्ति यस्तस्य पर्यावरणेन सहाद्वितीयं समन्वयं निर्धारयति इति[12] "Personality is dynamic organization within the individual of these psycho-physical systems that determine his unique adjustment to his environment.

एवम्प्रकारेण व्यक्तित्त्वविवेचनात् परम् व्यक्तित्त्वविकासे'अध्यापिकानां शैक्षिकसमायोजनम्' इति पदस्य विवेचनम् अत्र क्रियते। शैक्षिकसमायोजनस्यपूर्व शिक्षायाः विषये **नागोजिभट्टेनोक्तम्-**

परमपुरुषार्थ साधनीभूता ब्रह्मज्ञानरूपया एव शैक्षिकसमायोजनस्य प्रक्रिया प्रचलति।[13]

अतः शिक्षा एवं समायोजने अन्योन्याश्रयसम्बन्धः भवति। शिक्षया द्वारा समाजे9सायोजनप्रक्रियया व्यक्तेः शैक्षिकक्षेत्रे क्रियमाणां कार्याणां समन्वयनं स्थापने सहायको भवति । यतोहि व्यक्तिः स्वकीयेन वातावरणेन सह निरन्तरमेव समायुज्यते । तथा च परिवर्तनशीले वातावरणे सः सततं समायोजनं स्थापयितुं यत्नशीलो भवति। एतत्समायोजनमपि तस्यानन्यमेव भवति। वातावरणेन सह समायोजनमाप्तुं स परस्परं क्रियां विदधाति। वंशानुक्रमस्य वातावरणस्य चेत्युभयोः शक्त्योः परस्परक्रिया कारणादेव व्यक्तित्त्वम् अनन्यरूपेण विकसति। यतोहि व्यक्तेर्जीवनशैली भिन्नैव भवति। समायोजनपदस्यार्थः अस्यापरनाम सामञ्स्यम् , व्यवस्थापनम् , अनुकूलञ्च वर्तन्ते। समायोजने द्वौ शब्दौ वर्तेते यथा- 'सम् आयोजनम्' अत्र समायोजनम् इति पदस्योत्पत्तिः 'सम् उपसर्गपूर्वकात् युज् धातोः ण्वुल प्रत्ययेन' भवति। अर्थात् सम्यक् प्रकारेण व्यवस्थापनमेव समायोजनं भवति। येनमाध्यमेन व्यक्तेः व्यक्तित्त्वस्य विकासमपि कर्तुं शक्यते। यतोहि प्राक्कालादेव समाजं सुसम्क् व्यवस्थितं संचालनाय समायोजनाय मानवस्य व्यक्तित्त्वस्यकृते मनुनाऽपि उक्तम् यत् –

**धृतिः क्षमा दमोऽस्तेयं, शौचमिन्द्रियनिग्रहः।**
**धीविद्या सत्यमक्रोधो, दशकं धर्मलक्षणम्॥[14]**

एवम्प्रकारेण समायोजनस्यार्थं स्पष्टवन्तः **"गेड्स इत्यादय-** अन्य विद्वान्सःलिखितवन्तः यत् - एकस्मिन्नर्थे समायोजनं निरन्तरं प्रवहमाना प्रक्रियास्ति,यया व्यक्तिः स्वयं पर्यावरणोर्मध्ये सामस्यपूर्ण सम्बन्धस्थापनाय स्वव्यवहारे परिवर्तनं करोति।"अपरार्थे समायोजनशिक्षा एका संतुलिता दशास्ति, । यां दशां प्राप्तवन्तं वयं सुसमायोजितः व्यक्तित्त्वयुक्तः व्यक्तिः कथयामः ।[15] महानमनोवैज्ञानिकः समायोजनविषये उक्तम् यत् "मानवः स्वावश्यकतानां पूर्तिसन्दर्भ आवश्कता परिवेषयोः समतौल्यं यया प्रक्रियया स्वव्यक्तित्वं साधयति सैव समायोजनमित्युच्यते।" (एल. एस. शेफर)

10 -डॉ. लोकमान्य मिश्रः, आधुनिकशिक्षा मनोविज्ञानपृ. सं. 264

11 -उपरोक्तम्

12 - उपरोक्तम्

13 - शब्दकल्पद्रुम्

14 - मनुस्मृति-6/12

15 -आधुनिक शिक्षा मनोविज्ञान पृ.सं. 285-286

अतः निष्कर्षतः कथितुं शक्यते यत् - आवश्यकताविष्यकारस्य जननी वर्तते अस्य वाक्यस्य सार्थकता स्वयं सिद्धास्ति । वर्तमानशिक्षाजगति विशेषतया भारतस्य शिक्षायाः सन्दर्भे केवलम् अत्तयुत्तम प्राप्ताङ्कानां उपलब्धीनाञ्च कृते शिक्षकाः छात्राश्च प्रयत्नशीलाः दृश्यन्ते । छात्राणां परिवारस्याश्यकतापि बालकस्य व्यक्तित्त्वस्युपरि प्रभावयति। छात्राणामुपरि प्रायशः शिक्षिकाणां प्रभाव: अधिकं भवति । छात्रेषु असहनशीलता-उद्दण्डता- कुसमायोजनम् अधीरता, अनैतिकता- कठोरता- चाञ्चल्यम्- चारित्रिकदोषेत्यादीनां निवारणार्थं निरन्तरं अध्यापिका: प्रयासरता भवेयु: । स्वस्युपरि अवधानं दत्वा एव व्यक्तित्वविकासे सक्षमा: भवितुं शक्नोति । छात्राणामपि व्यक्तित्वविकासे सहाय्यं व वर्धनम् कर्तुं शक्नोति । अत: एतेषां दोषाणां निवारयितुं प्राथमिक स्तरीयाध्यापिकाणां व्यक्तित्वविकासस्य कृते समायोजनशिक्षायाः उपादेयता भवति । यतोहि मानवस्य सर्वांगीणविकासस्योद्देश्यमधिकृत्य सर्वत्र छात्रेभ्यः समायोजनशिक्षा प्रदीयमाना वर्तते । समायोजनविषये 'भगवद्गीतायाः चतुर्थाध्याये' अतिसमीचीनाः सिद्धान्तः प्रतिपादितः यथा –

**"यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।**
**समः सिद्धावसिद्धौ च कृत्वापि न निवध्यते ॥"[16]**

**सन्दर्भग्रन्थसूची**

1. महिला विकास एक मूल्याकन, प्रो. मधुसूदन त्रिपाठी, ओमेगा पब्लिकेशन्स, 2010
2. आधुनिकं शिक्षामनोविज्ञानम् , डॉ. लोकमान्य मिश्रः,मृगाक्षी प्रकाशनम्, लखनऊ, 2013
3. शिक्षा एवं संस्कृतिः नये संदर्भ, डॉ. भास्कर मिश्र, भावना प्रकाशन, 1995
4. भारतीया पुरातनी शिक्षा ,डॉ. लोकमान्य मिश्रः , मृगाक्षी प्रकाशनम्, लखनऊ, 2013
5. धर्म का समाजशास्त्र, डॉ. कमलस्वरूप श्रीवास्तव, प्रकाशन कुटीर, 2018

[16]-श्रीमद्भगवद्गीता 4/22